# kIrtanAni sadAshivabrahmendravirachitam

# કીર્તનાનિ સદાશિવબ્રહ્મેન્દ્રવિરચિતમ્

## Document Information

Text title : Kirtanas composed by Sadashivabrahmendra

File name : kIrtanAnisadAshivabrahmendra.itx

Category : deities_misc, sadAshivabrahmendra, kRitI

Location : doc_deities_misc

Author : Sadashivabrahmendra

Transliterated by : P. P. Narayanaswami swami at mun.ca

Proofread by : P. P. Narayanaswami swami at mun.ca

Latest update : June 18, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# કીર્તનાનિ સદાશિવબ્રહ્મેન્દ્રવિરચિતમ્

## પિબરે રામ રસં

રાગં– યમુનાકલ્યાણિ  તાળં– આદિ

પલ્લવિ

પિબરે રામરસં રસને

પિબરે રામ રસં

ચરણં

દૂરીકૃતપાતકસંસર્ગં

પૂરિતનાનાવિધફલવર્ગમ્ ॥ ૧॥

જનનમરણભયશોકવિદૂરં

સકલશાસ્ત્રનિગમાગમસારમ્ ॥ ૨॥

પરિપાલિત સરસિજ ગર્ભાણ્ડં

પરમપવિત્રીકૃતપાષાણ્ડમ્ ॥ ૩॥

શુદ્ધપરમહંસાશ્રિતગીતં

શુકશૌનકકૌશિકમુખપીતમ્ ॥ ૪॥

## ખેલતિ મમ હૃદયે

રાગં– અઠાણા  તાળં– આદિ

પલ્લવિ

ખેલતિ મમ હૃદયે રામઃ

ખેલતિ મમ હૃદયે

અનુપલ્લવિ

મોહમહાર્ણવતારકકારી

રાગદ્વેષમુખાસુરમારી

ચરણં

શાન્તિવિદેહસુતાસહચારી

દહરાયોધ્યાનગરવિહારી

પરમહંસસામ્રાજ્યોદ્ધારી

સત્યજ્ઞાનાનન્દશરીરી

## ચેતઃ શ્રીરામં

રાગં– સુરટિ તાળં– આદિ

પલ્લવિ

ચેતઃ શ્રી રામં ચિન્તય

જીમૂત શ્યામં

ચરણં

અંગીકૃતતુંબુરુસંગીતં

હનુમદ્ગવયગવાક્ષસમેતમ્ ॥ ૧॥

નવરત્નસ્થાપિતકોટીરં

નવતુલસીદળકલ્પિતહારમ્ ॥ ૨॥

પરમહંસહૃદ્ગોપુરદીપં

ચરણદલિતમુનિતરુણીશાપમ્ ॥ ૩॥

## ભજ રે રઘુવીરં

રાગં– કલ્યાણિ તાળં– મિશ્ર ચાપુ

પલ્લવિ

ભજ રે રઘુવીરં માનસ

ભજ રે બહુધીરં

અનુપલ્લવિ

અંબુદડિંભવિડંબનગાત્રં

અંબુદવાહનનન્દનદાત્રં

ચરણં

કુશિકસુતાર્પિતકાર્મુકવેદં
વશિહૃદયાંબુજભાસ્કરપાદં
કુણ્ડલમણ્ડનમણ્ડિતકર્ણં
કુણ્ડલિમઞ્જકમદ્ભુતવર્ણમ્ ॥ ૧॥

દણ્ડિતસુન્દસુતાદિકવીરં
મણ્ડિતમનુકુલમાશ્રયશૌરિં
પરમહંસમખિલાગમવેદ્યં
પરમવેદમકુટીપ્રતિપાદ્યમ્ ॥ ૨॥

## ભજ રે ગોપાલં

રાગં- હિન્દોળં  તાળં – આદિ

પલ્લવિ

ભજ રે ગોપાલં માનસ
ભજ રે ગોપાલં

ચરણં

ભજ ગોપાલં ભજિતકુચેલં
ત્રિજગન્મૂલં દિતિસુતકાલમ્ ॥ ૧॥

આગમસારં યોગવિચારં
ભોગશરીરં ભુવનાધારમ્ ॥ ૨॥

કદનકઠોરં કલુષ્વિદૂરં
મદનકુમારં મધુસંહારમ્ ॥ ૩॥

નતમન્દારં નન્દકિશોરં
હતચાણૂરં હંસવિહારમ્ ॥ ૪॥

## સ્મર વારં વારં

રાગં- કાપિ  તાળં- આદિ

પલ્લવિ

સ્મર વારં વારં ચેતઃ

સ્મર નન્દકુમારં

ચરણં

ઘોષકુટીરપયોધૃતચોરં

ગોકુલવૃન્દાવનસઞ્ચારમ્ ॥ ૧॥

વેણુરવામૃતપાનકઠોરં

વિશ્વસ્થિતિલયહેતુવિહારમ્ ॥ ૨॥

પરમહંસહૃત્પઞ્ચરકીરં

પટુતરધેનુકબકસંહારમ્ ॥ ૩॥

## બ્રૂહિ મુકુન્દેતિ

રાગં– કુરઞ્ચિ          તાળં– આદિ

પલ્લવિ

બ્રૂહિ મુકુન્દેતિ રસને

બ્રૂહિ મુકુન્દેતિ

ચરણં

કેશવમાધવગોવિન્દેતિ

કૃષ્ણાનન્દસદાનન્દેતિ ॥ ૧॥

રાધારમણહરેરામેતિ

રાજીવાક્ષઘનશ્યામેતિ ॥ ૨॥

ગરુડગમનનન્દકહસ્તેતિ

ખણ્ડિતદશકન્ધરમસ્તેતિ ॥ ૩॥

અક્રૂરપ્રિયચક્રધરેતિ

હંસનિરઞ્જનકંસહરેતિ ॥ ૪॥

## માનસ સઞ્ચર રે

રાગં– સામ          તાળં– આદિ

પલ્લવિ

માનસ સઞ્ચર રે બ્રહ્મણિ

માનસ સઞ્ચર રે

અનુપલ્લવિ

મદશિખિપિઞ્છાલઙ્કૃતચિકુરે

મહનીયકપોલવિજિતમુકરે

ચરણં

શ્રીરમણીકુચદુર્ગવિહારે

સેવકજનમન્દિરમન્દારે ॥ ૧॥

પરમહંસમુખચન્દ્રચકોરે

પરિપૂરિતમુરળીરવધારે ॥ ૨॥

## ગાયતિ વનમાલી

રાગં- મિશ્ર કાપિ　　તાળં- આદિ

પલ્લવિ

ગાયતિ વનમાલી મધુરં

ગાયતિ વનમાલી

ચરણં

પુષ્પસુગન્ધિસુમલયસમીરે

મુનિજનસેવિતયમુનાતીરે ॥ ૧॥

કૂજિતશુકપિકમુખખગકુઞ્જે

કુટિલાલકબહુનીરદપુઞ્જે ॥ ૨॥

તુલસીદામવિભૂષણહારી

જલજભવસ્તુતસદ્ગુણશૌરી ॥ ૩॥

પરમહંસહૃદયોત્સવકારી

પરિપૂરિતમુરળીરવધારી ॥ ૪॥

## ક્રીડતિ વનમાલી

રાગં- સિન્ધુભૈરવિ　　તાળં- આદિ

પલ્લવિ

ક્રીડતિ વનમાલી ગોષ્ઠે
ક્રીડતિ વનમાલી
        ચરણં
પ્રહ્ળાદપરાશરપરિપાલી
પવનાત્મજજાંબવદનુકૂલી ॥ ૧॥

પદ્માકુચપરિરંભણશાલી
પટુશરશાસિતમાલિસુમાલી ॥ ૨॥

પરમહંસવરકુસુમસુમાલી
પ્રણવપયોરુહગર્ભકપાલી ॥ ૩॥

## ભજ રે યદુનાથં

રાગં- પીલૂ     તાળં- આદિ

        પલ્લવિ
ભજ રે યદુનાથં માનસ
ભજ રે યદુનાથં
        ચરણં
ગોપવધૂપરિરંભણલોલં
ગોપકિશોરકમદ્ભુતલીલમ્ ॥ ૧॥

કપટાંગીકૃતમાનુષવેષં
કપટનાટ્યકૃતકૃત્સ્નસુવેષમ્ ॥ ૨॥

પરમહંસહૃત્તત્વસ્વરૂપં
પ્રણવપયોધરપ્રણવસ્વરૂપમ્ ॥ ૩॥

## પ્રતિવારં વારં

રાગં- કાંભોજિ     તાળં- મિશ્રચાપુ

        પલ્લવિ
પ્રતિવારં વારં
માનસ ભજ રે રઘુવીરં

અનુપલ્લવિ

કાલાંભોધરકન્તશરીરં

કૌશિકશુકશૌનકપરિવારં

ચરણં

કૌસલ્યાદશરથસુકુમારં

કલિકલ્મષભયગહનકુઠારમ્ ॥ ૧॥

પરમહંસહૃત્પદ્મવિહારં

પ્રતિહતદશમુખબલવિસ્તારમ્ ॥ ૨॥

## ખેલતિ બ્રહ્માણ્ડે

રાગં- સિન્ધુભૈરવિ      તાળં- આદિ

પલ્લવિ

ખેલતિ બ્રહ્માણ્ડે ભગવાન્

ખેલતિ બ્રહ્માણ્ડે

ચરણં

હંસઃ સોઽહં હંસઃ સોઽહં

હંસઃ સોઽહં સોઽહમિતિ ॥ ૧॥

પરમાત્મોઽહં પરિપૂર્ણોઽહં

બ્રહ્મૈવાહમહં બ્રહ્મેતિ ॥ ૨॥

ત્વક્ચક્ષુઃ શ્રુતિજિહ્વાઘ્રાણે

પઞ્ચવિધપ્રાણોપસ્થાને ॥ ૩॥

શબ્દસ્પર્શરસાદિકમાત્રે

સાત્વિકરાજસતામસમિત્રે ॥ ૪॥

બુદ્ધિમનશ્ચિત્તાહઙ્કારે

ભૂજલતેજોગગનસમીરે ॥ ૫॥

પરમહંસરૂપેણ વિહર્તા

બ્રહ્મવિષ્ણુરુદ્રાદિકર્તા ॥ ૬॥

## સ્થિરતા નહિ નહિ રે

રાગં- પુન્નાગવરાળિ તાળં- આદિ

પલ્લવિ

સ્થિરતા નહિ નહિ રે માનસ
સ્થિરતા નહિ નહિ રે

ચરણં

તાપત્રયસાગરમગ્નાનાં
દર્પાહઙ્કારવિલગ્નાનામ્ ॥ ૧॥

વિષયપાશવેષ્ટિતચિતાનાં
વિપરીતજ્ઞાનવિમતાનામ્ ॥ ૨॥

પરમહંસયોગવિરુદ્ધાનાં
બહુચઞ્ચલતરસુખસિદ્ધાનામ્ ॥ ૩॥

## નહિ રે નહિ રે શઙ્કા કાચિત્

રાગં- મોહનં તાળં- આદિ

પલ્લવિ

નહિ રે નહિ રે શઙ્કા કાચિત્
નહિ રે નહિ રે શઙ્કા

ચરણં

અજમક્ષરમદ્વૈતમનન્તં
ધ્યાયામિ બ્રહ્મ પરં શાન્તમ્ ॥ ૧॥

યે ત્યજન્તિ બહુતરપરિતાપં
યે ભજન્તિ સચ્ચિત્સુખરૂપમ્ ॥ ૨॥

પરમહંસગુરુભણિતં ગીતં
યે પઠન્તિ નિગમાર્થસમેતમ્ ॥ ૩॥

## ચિન્તા નાસ્તિ કિલ

રાગં- નવરોજ્ તાળં- આદિ

પલ્લવિ

ચિન્તા નાસ્તિ કિલ  તેષાં
ચિન્તા નાસ્તિ કિલ

ચરણં

સમદમકરુણાસમ્પૂર્ણાનાં
સાધુસમાગમસઙ્કીર્ણાનામ્ ॥ ૧॥

કાલત્રયજિતકન્દર્પાણાં
ખણ્ડિતસર્વેન્દ્રિયદર્પાણામ્ ॥ ૨॥

પરમહંસગુરુપદચિત્તાનાં
બ્રહ્માનન્દામૃતમત્તાનામ્ ॥ ૩॥

## બ્રહ્મૈવાહં કિલ

રાગં– નાથનામક્રિયા    તાળં– આદિ

પલ્લવિ

બ્રહ્મૈવાહં કિલ સદ્ગુરુકૃપયા
બ્રહ્મૈવાહં કિલ

ચરણં

બ્રહ્મૈવાહં કિલ ગુરુકૃપયા
ચિન્મયબોધાનન્દઘનં તત્ ॥ ૧॥

શ્રુત્યન્તૈકનિરૂપિતમતુલં
સત્યસુખાંબુધિસમરસમનઘમ્ ॥ ૨॥

કર્માકર્મવિકર્મવિદૂરં
નિર્મલસંવિદખણ્ડમપારમ્ ॥ ૩॥

નિરવધિસત્તાસ્પદપદમજરં
નિરુપમમહિમનિ નિહિતમનીહમ્ ॥ ૪॥

આશાપાશવિનાશનચતુરં
કોશપઞ્ચકાતીતમનન્તમ્ ॥ ૫॥

કારણકારણમેકમનેકં

કાલકાલકલિદોષવિહીનમ્ ॥ ૬॥

અપ્રમેયપદમખિલાધારં
નિષ્પ્રપઞ્ચનિજનિષ્ક્રિયરૂપમ્ ॥ ૭॥

સ્વપ્રકાશશિવમદ્વયમભયં
નિષ્ પ્રતર્ક્યમનપાયમકાયમ્ ॥ ૮॥

## સર્વં બ્રહ્મમયં

રાગં– ચેઞ્ચુરુટ્ટિ  તાળં– આદિ

પલ્લવિ

સર્વં બ્રહ્મમયં રે રે
સર્વં બ્રહ્મમયં

ચરણં

કિં વચનીયં કિમવચનીયં
કિં રચનીયં કિમરચનીયમ્ ॥ ૧॥

કિં પઠનીયં કિમપઠનીયં
કિં ભજનીયં કિમભજનીયમ્ ॥ ૨॥

કિં બોદ્ધવ્યં કિમબોદ્ધવ્યં
કિં ભોક્તવ્યં કિમભોક્તવ્યમ્ ॥ ૩॥

સર્વત્ર સદા હંસધ્યાનં
કર્તવ્યં ભો મુક્તિનિદાનમ્ ॥ ૪॥

## તદ્વજ્જીવત્વં બ્રહ્મણિ

રાગં– કીરવાણિ  તાળં– આદિ

પલ્લવિ

તદ્વજ્જીવત્વં બ્રહ્મણિ
તદ્વજ્જીવત્વં

અનુપલ્લવિ

યદ્વત્ તોયે ચન્દ્રદ્વિત્વં

યદ્વન્મુકુરે પ્રતિબિંબત્વં
    ચરણં
સ્થાણૌ યદ્વન્નરરૂપત્વં
ભાનુકરે યદ્વત્ તોયત્વમ્ ॥ ૧॥

શુક્તૌ યદ્વત્ રજતમયત્વં
રજ્જૌ યદ્વત્ ફણિદેહત્વમ્ ॥ ૨॥

પરમહંસગુરુણાऽદ્વયવિદ્યા
ભણતિ ધિક્કૃતમાયાવિદ્યા ॥ ૩॥

## પૂર્ણ બોધોહં

રાગં– પૂર્વિકલ્યાણિ    તાળં– આદિ

    પલ્લવિ
પૂર્ણબોધોऽહં સદાનન્દ
પૂર્ણબોધોऽહં
    અનુપલ્લવિ
વર્ણાશ્રમાચારકર્માદિદૂરોऽહં
સ્વર્ણવદખિલવિકારગતોऽહં
    ચરણં
પ્રત્યગાત્માऽહં પ્રવિતતસત્યઘનોऽહં
શ્રુત્યન્તશતકોટિપ્રકટિતબ્રહ્માહં
નિત્યોऽહમભયોऽહમદ્વિતીયોऽહમ્ ॥ ૧॥

સાક્ષિમાત્રોऽહં પ્રગલિતપક્ષપાતોऽહં
મોક્ષસ્વરૂપોऽહમોङ્કારગમ્યોऽહં
સૂક્ષ્મોऽહમનઘોऽહમદ્ભુતાત્માऽહમ્ ॥ ૨॥

સ્વપ્રકાશોऽહં વિભુરહં નિષ્ પ્રપઞ્ચોऽહં
અપ્રમેયોऽહમચલોऽહમકલોऽહં
નિષ્પ્રતર્ક્યાખણ્ડૈકરસોऽહમ્ ॥ ૩॥

અજનિર્મિતોऽહં બુધજનભજનીયોऽહં
અજરોऽહમમરોऽહમમૃતસ્વરૂપોऽહં

નિજપૂર્ણમહિમનિ નિહિતમહિતોઽહમ્ ॥ ૪॥

નિરવયવોઽહં નિરુપમનિષ્કળઙ્કોઽહં
પરમશિવેન્દ્ર શ્રીગુરુસોમસમુદિત -
નિરવધિનિર્વાણસુખસાગરોઽહમ્ ॥ ૫॥

## આનન્દપૂર્ણ બોધોહં (૧)

રાગં– મધ્યમાવતિ તાળં – ખણ્ડ ચાપુ (ઝમ્પ)

પલ્લવિ
આનન્દપૂર્ણબોધોઽહં સતત -
માનન્દપૂર્ણબોધોઽહજરોહં
ચરણં
પ્રત્યગદ્વૈતસારોઽહં સકલ
શ્રુત્યન્તતન્ત્રવિદિતોઽહં અમૃતોઽહં
અત્યનન્તરભાવિતોઽહં વિદિત -
નિત્યનિષ્કલરૂપનિર્ગુણપદોઽહમ્ ॥ ૧॥

સાક્ષિચિન્માત્રગાત્રોઽહં પરમ -
મોક્ષસામ્રાજ્યાધિપોઽહમમૃતોઽહં
પક્ષપાતાતિદૂરોઽહં અધિક -
સૂક્ષ્મોઽહમનવધિકસુખસાગરોઽહમ્ ॥ ૨॥

સ્વપ્રકાશૈકસારોઽહં સદહ -
મપ્રપઞ્ચાત્મભાવોઽહમભયોઽહં
નિષ્પ્રતર્ક્યોઽહં અમરોઽહં ચિદહ -
મપ્રમેયાખ્યમૂર્તિરેવાહમ્ ॥ ૩॥

## આનન્દપૂર્ણબોધોહં (૨)

રાગં– શઙ્કરાભરણં તાળં – મિશ્ર ચાપુ

પલ્લવિ
આનન્દપૂર્ણબોધોઽહં સચ્ચિ -
દાનન્દપૂર્ણબોધોઽહં શિવોઽહં

ચરણં

સર્વાત્મચરોઽહં પરિ -
નિર્વાણનિર્ગુણનિખિલાત્મકોઽહં
ગીર્વાણવર્યાનતોઽહં કામ -
ગર્વનિર્વાપણધીરતરોઽહમ્ ॥ ૧॥

સત્યસ્વરૂપાપરોઽહં વર -
શ્રુત્યન્તબોધિતસુખસાગરોઽહં
પ્રત્યગભિન્નપરોઽહં શુદ્ધ -
મન્તરહિતમાયાતીતોઽહમ્ ॥ ૨॥

અવબોધરસસાગરોઽહં વ્યોમ -
પવનાદિપઞ્ચભૂતાતિદૂરોઽહં
કવિવરસંસેવ્યોઽહં ઘોર -
ભવસિન્ધુતારકપરમસૂક્ષ્મોઽહમ્ ॥ ૩॥

બાધિતગુણકલનોઽહં બુદ્ધ -
શોધિતસમરસપરમાત્માઽહં
સાધનજાતાતીતોઽહં નિરુ -
પાધિકનિઃસીમભૂમાનન્દોઽહમ્ ॥ ૪॥

નિરવયવોઽહમજોઽહં
નિરુપમમહિમનિ નિહિતમહિતોઽહં
નિરવધિસત્વઘનોઽહં ધીર -
પરમશિવેન્દ્ર શ્રીગુરુબોધિતોઽહમ્ ॥ ૫॥

## કૃષ્ણ પાહિ

રાગં– મધ્યમાવતિ    તાળં– આદિ

પલ્લવિ

કૃષ્ણ પાહિ જિતકૃશાનો પાહિ
કૃષ્ણ વૃષ્ણિકુલદીપ વિષ્ણો પાહિ

ચરણં

અત્યન્તસુકુમાર સાધુશીલ વર

શ્રુત્યન્તખેલન ગોપાલ લીલ ॥ ૧॥

વૃન્દારક મુનિવૃન્દવન્દ્યપાદ
વૃન્દાવનચર વેણુરસવિનોદ ॥ ૨॥

સત્યભામા કુચકુઙ્કુમાઙ્કિતાંગ
સત્યકામ સનકનુત પાદ ગંગ ॥ ૩॥

પરમહંસમાનસ વિલાસ હંસ
પરમ પાવન નામ ભાવિત હંસ ॥ ૪॥

## તુંગ તરંગે ગંગે

રાગં– કુન્તળવરાળિ   તાળં– આદિ

પલ્લવિ
તુંગતરંગે ગંગે જય
તુંગતરંગે ગંગે

અનુપલ્લવિ
કમલભવાણ્ડકરણ્ડપવિત્રે
બહુવિધબન્ધચ્છેદલવિત્રે

ચરણં
દૂરીકૃતજનપાપસમૂહે
પૂરિતકચ્છપગુચ્છગ્રાહે
પરમહંસગુરુભણિતચરિત્રે
બ્રહ્મવિષ્ણુશઙ્કરનુતિપાત્રે

Encoded and proofread by P. P. Narayanaswami swami at mun.ca

*kIrtanAni sadAshivabrahmendravirachitam*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*